{संस्कृतभाषा का महत्त्व}

सन्दर्भ- प्रस्तुत अवतरण ' संस्कृत दिग्दर्शिका ' के ' संस्कृतभाषायाः महत्त्वम् ' शीर्षक पाठ से अवतरित है ।

- धन्योऽयम् भारतदेश : यत्र समुल्लसति जनमानसपावनी ,

धन्य है यह भारत देश , जहां जनमानस को पवित्र करने वाली ,

- भव्यभावोद्भाविनी , शब्द - सन्दोह - प्रसविनी सुरभारती ।

भव्य भावों को उत्पन्न करने वाली , शब्द समूह को जन्म देने वाली देववाणी ,सुशोभित हो रही है ,

- विद्यमानेषु निखिलेष्वपि वाङ्मयेषु

सभी वर्तमान साहित्यों में

- अस्या : वाङ्यम् सर्वश्रेष्ठं सुसम्पन्नं च वर्तते ।

इसका साहित्य सर्वश्रेष्ठ और सुसम्पन्न है ।

- इयमेव भाषा संस्कृतनाम्नापि लोके प्रथिता अस्ति ।

यही आज संस्कृत नाम से भी संसार में प्रसिद्ध है ।

- अस्माकं रामायण महाभारताद्यैतिहासिकग्रन्थाः ,

हमारे रामायण , महाभारत आदि ऐतिहासिक ग्रन्थ ,

- चत्वारोवेदाः , सर्वा उपनिषदः , अष्टादशपुराणानि ,

चारों वेद , सभी उपनिषद् अठारह पुराण

- अन्यानि च महाकाव्य - नाट्यादीनि अस्यामेव भाषायां लिखितानि सन्ति ।

और अन्य महाकाव्य ,नाटक आदि इसी भाषा में लिखे गए हैं ।

- इयमेव भाषा सर्वासामार्यभाषाणां जननीति मन्यते भाषातत्त्वविद्भिः ।

यही भाषा सभी आर्यभाषाओं की जननी भाषा - वैज्ञानिकों द्वारा मानी जाती है ।

- संस्कृतस्य गौरवं बहुविधज्ञानाश्रयत्वं

संस्कृत का गौरव , अनेक प्रकार के ज्ञान का आश्रय होना

- व्यापकत्वं च न कस्यापि दृष्टेरविषयः ।

और व्यापकता किसी भी दृष्टि का विषय नहीं है ।

- संस्कृतस्य गौरवमेव दृष्टिपथमानीय सम्यगुक्तमाचार्यप्रवरेण दण्डिना-

संस्कृत के गौरव को दृष्टि में रखकर आचार्य प्रवर दण्डी ने कहा है –

- "संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ।"

संस्कृत को महर्षियों ने देववाणी कहा है ।

- संस्कृतस्य साहित्यं सरसं , व्याकरणञ्च सुनिश्चितम् ।

संस्कृत का साहित्य सरस और व्याकरण सुनिश्चित है ।

- तस्य गद्ये पद्ये च लालित्यं , भावबोधसामर्थ्यम् ,

उसके गद्य और पद्य में लालित्य (सौन्दर्य) भावों का बोध कराने की क्षमता

- अद्वितीयं श्रुतिमाधुर्यञ्च वर्तते ।

और अद्वितीय श्रुति मधुरता विद्यमान है ।

- किं बहुना चरित्रनिर्माणार्थं यादृशीं सत्प्रेरणा संस्कृतवाङ्मयं ददाति

अधिक क्या चरित्र निर्माण के लिए जैसी उत्तम प्रेरणा संस्कृत वाङ्मय देता है ,

- न तादृशीम् किञ्चिदन्यत् ।

वैसी अन्य कोई नहीं ।

- मूलभूतानां मानवीयगुणानां यादृशी विवेचना

मूलभूत मानवीय गुणों की जैसी विवेचना

- संस्कृतसाहित्ये वर्तते नान्यत्र तादृशी ।

संस्कृत साहित्य में मिलती है , वैसी अन्यत्र नहीं ।

- दया , दानं , शौचम् , औदार्यम् , अनसूया , क्षमा ,

दया , दान , पवित्रता , उदारता , किसी से ईर्ष्या न करना , क्षमा

- अन्ये चानेके गुणाः अस्य साहित्यस्य अनुशीलनेन सञ्जायन्ते ।

और अन्य अनेक गुण इस साहित्य के अध्ययन से उत्पन्न होते हैं ।

- संस्कृतसाहित्यस्य आदिकवि : वाल्मीकिः , महर्षिव्यासः ,

संस्कृत साहित्य के आदि कवि वाल्मीकि , महर्षि वेदव्यास ,

- कविकुलगुरुः कालिदासः अन्ये च भास - भारवि भवभूत्यादयो

कविकुल गुरु कालिदास और अन्य भास , भारवि , भवभूति आदि

- महाकवयः स्वकीयैः ग्रन्थरत्नैः अद्यापि पाठकानां हृदि विराजन्ते ।

महाकवि अपने रचित ग्रन्थ रत्नों के द्वारा आज भी पाठकों के हृदय में विराजमान हैं ।

- इयं भाषा अस्माभिः मातृसमं सम्माननीया वन्दनीया च ,

यह भाषा हमारी माता के समान सम्माननीया और पूजनीया है ,

- यतो भारतमातुः स्वातन्त्र्यं , गौरवम् ,

क्योंकि भारत माता की स्वतन्त्रता , गौरव ,

- अखण्डत्वं सांस्कृतिकमेकत्वञ्च संस्कृतेनैव सुरक्षितुं शक्यन्ते ।

अखण्डता एवं सांस्कृतिक एकता को संस्कृत के द्वारा ही सुरक्षित किया जा सकता है ।

- इयं संस्कृतभाषा सर्वासु भाषासु प्राचीनतमा श्रेष्ठा चास्ति ।

यह संस्कृत भाषा सभी भाषाओं में प्राचीनतम और श्रेष्ठ है ।

- तत : सुष्ठूक्तम्

इसलिए ठीक ही कहा गया है

- ' भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ' इति ।

Gyansindhu

भाषाओं में देववाणी संस्कृत मुख्य , मधुर और अलौकिक है ।

Gyansindhu